प्रशुमण्डूकमार्जारश्वसर्पनकुलाखुभिः ।
अन्तरागमने विद्यादनध्यायमहर्न्निशम् ॥
द्वावेव वर्ज्जयेन्नित्यमनध्यायौ प्रयत्नतः ।
स्वाध्यायभूमिञ्चाशुद्धामात्मानञ्चाशुचिं द्विजः ॥”
इति मानवे । ४ । १०१—१२७ ॥

नित्यानित्यवस्तुविवेकः, पुं, (नित्यानित्ये वस्तुनी तयोर्व्विवेकः विवेचनम् ।) ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम् । इति वेदान्तसारः ॥

नित्याभैरवी, स्त्री, (नित्या तदाख्यया प्रसिद्धा भैरवी ।) भैरवीविशेषः । अस्या ध्यानादिकं षट्कूटाभैरवीध्यानादिवत् ॥ ध्यानं यथा,—
“बालसूर्य्यप्रभां देवीं जवाकुसुमसन्निभाम् ।
मुण्डमालावलीरम्यां बालसूर्य्यसमांशुकाम् ॥
सुवर्णकलसाकारपीनोन्नतपयोधराम् ।
पाशाङ्कुशौ पुस्तकञ्च तथा च जपमालिकाम् ॥”
दधतीमिति शेषः । इति तन्त्रसारः ॥ (अस्या बीजं यथा, ‘हसकलरडैं’ ‘हसकलरडीं’ ‘हसकलरडौं ॥’)

निदं, क्ली, (नेदतीति । निद कुत्सायाम् + “इगुपधज्ञेति ।” ३ । १ । १३५ । इति कः ।) विषम् । इति शब्दचन्द्रिका ॥

निदद्रुः, पुं, (भिदात् विघात् द्राति पलायते इति । द्रा + मृगय्वादित्वात् कुप्रत्ययेन साधुः ।) मनुष्यः । इति शब्दचन्द्रिका ॥ (निर्नास्ति दद्रु-र्यस्येति विग्रहे । दद्रुरोगरहिते, त्रि ॥)

निदर्शनं, क्ली, (निदृश्यतेऽनेनेति । नि + दृश् + ल्युट् ।) दृष्टान्तः । उदाहरणम् । यथा,—
“यक्तः प्राक्तेऽपि दृष्टान्तावुभे शास्त्रनिदर्शने ॥”
इति नानार्थटीकायां भरतः ॥
(“दृष्टान्तेनार्थः प्रसाध्यते यत्र तन्निदर्शनम् ॥ यथाग्निर्वायुना सहितः कोष्ठे वृद्धिङ्गच्छति तथा वातपित्तकफदुष्टो व्रण इति ॥” इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतेनोक्तम् ॥)

निदर्शना, स्त्री, (निदर्शयतीति । नि + दृश् + णिच् + ल्युः । टाप् ।) काव्यालङ्कारविशेषः । तस्य लक्षणम् ।
“अर्थान्तरप्रवृत्तेन किञ्चित्तत्सदृशं फलम् ।
सदसत्त्वान्निदर्श्येत यदि सा स्यान्निदर्शना ॥”
उदाहरणं यथा, दण्डी ।
“उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् ।
विभावयितुमृद्धीनां फलं सुहृदनुग्रहम् ॥”
(यथा च साहित्यदर्पणे । १० । ७० ।
“सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित् ।
यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना ॥
अत्र सम्भवद्वस्तुसम्बन्धनिदर्शना । यथा,—
‘कोऽत्र भूमिवलये जनान् मुधा
तापयन् सुचिरमेति सम्पदम् ।
वेदयन्निति दिनेन भानुमा-
नाससाद चरमाचलं ततः ॥’
अत्र रवेरीदृशार्थवेदनक्रियायां कर्त्तृत्वेनान्वयः सम्भवत्येव ईदृशार्थज्ञापनसमर्थचरमाचलप्राप्ति-रूपधर्म्मवत्त्वात् । स च रवेरस्ताचलगमनस्य परतापिनां विपत्प्राप्तेश्च बिम्बप्रतिबिम्बभावं बोधयति । असम्भवद्वस्तुसम्बन्धनिदर्शना त्वेकवाक्यानेकवाक्यगतत्वेन द्विविधा । तत्रैकवाक्यगा यथा,—
‘कलयति कुवलयमाला-
ललितं कुटिलः कटाक्षविक्षेपः ।
अधरः किसलयलीला-
माननमस्याः कलानिधेर्व्विलासम् ॥’
अत्रान्यस्य धर्म्मं कथमन्यो वहत्विति कटाक्षविक्षेपादीनां कुवलयमालादिगतललितादीनां कलनमसम्भवत् तल्ललितादिसदृशं ललितादिकमवगमयत् कटाक्षविक्षेपादेः कुवलयमालादेश्च बिम्बप्रतिबिम्बभावं बोधयति । यथा वा ।
‘प्रयाणे तव राजेन्द्र ! मुक्ता वैरीमृगीदृशाम् ।
राजहंसगतिः पद्भ्यामाननेन शशिद्युतिः ॥’
अत्र पादाभ्यामसम्बद्धराजहंसगतेस्त्यागोऽनुपपन्न इति तयोस्तत्सम्बन्धः कल्प्यते । स चासम्भवन् राजहंसगतिमिव गतिं बोधयति । अनेकवाक्यगा यथा,—
‘इदं किलाव्याजमनोहरं वपु-
स्तपः क्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥’
अत्र यत्तच्छब्दनिर्द्दिष्टवाक्यार्थयोरभेदेनान्वयोऽनुपपद्यमानस्तादृशवपुषस्तपःक्षमत्वसाधनेच्छा नीलोत्पलपत्रधारया शमीलताच्छेदनेच्छेवेति बिम्बप्रतिबिम्बभावे पर्य्यवस्यति । यथा वा ।
‘जन्मेदं वन्ध्यतां नीतं भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो हन्त चिन्तामणिर्म्मया ॥’
अत्र भवभोगलोभेन जन्मनो व्यर्थतानयनं काचमूल्येन चिन्तामणिविक्रय इवेति पर्य्यवसानम् । एवम् ।
‘क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥’
अत्र मन्मत्या सूर्य्यवंशवर्णनमुडुपेन सागरतरणमिवेति पर्य्यवसानम् । इयं क्वचिदुपमेयवृत्तस्योपमानेऽसम्भवेऽपि भवति । यथा,—
‘योऽनुभूतः कुरङ्गाक्ष्यास्तस्या मधुरिमाधरे ।
समास्वादि स मृद्वीकारसे रसविशारदैः ॥’
अत्र प्रकृतस्याधरस्य मधुरिमधर्म्मस्य द्राक्षारसेऽसम्भवात् । पूर्व्ववत् साम्ये पर्य्यवसानम् । मालारूपापि यथा मम ।
‘क्षिपसि शुकं वृषदंशकवदने
मृगमर्पयसि मृगादनरदने ।
वितरसि तुरगं महिषविषाणे
निदधच्चेतो भोगवितान ॥’
इह बिम्बप्रतिबिम्बताक्षेपं विना वाक्यार्थापर्य्यवसानम् । दृष्टान्ते तु पर्य्यवसितेन वाक्यार्थेन सामर्थ्याद्बिम्बप्रतिबिम्बताप्रत्यायनम् । नापीयमर्थापत्तिस्तत्र ‘हारोऽयं हरिणाक्षीणाम् ।’ इत्यादौ सादृश्यपर्य्यवसानाभावात् ॥)

निदाघः, पुं, (नितरां दह्यतेऽत्र अनेन वा । नि + दह + घञ् । न्यङ्क्वादित्वात् कुत्वम् ।) ग्रीष्मकालः । (यथा, रघुः । १० । ८३ ।
“ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च ।
मनो जह्रुर्निदाघान्ते श्यामाभ्रा दिवसा इव ॥”)
उष्णः । घर्म्मः । इत्यमरमेदिनीकरौ ॥ (यथा, रघुः । १२ । ३२ ।
“रावणावरजा तत्र राघवं मदनातुरा ।
अभिपेदे निदाघार्त्ता व्यालीव मलयद्रुमम् ॥”)
निदाघे वर्णनीयानि यथा । पाटलपुष्पम् १ मल्लिकापुष्पम् २ तापः ३ सरः४ पथिकशोषः ५ वायुः६ सेकः ७ शक्तुः ८ प्रपा ९ स्त्री १० मृगतृष्णा ११ आम्रादिफलपाकः १२ । इति कविकल्पलता ॥
(“ता एवौषधयो निदाघे निःसारा रूक्षा अतिमात्रं लघ्व्यो भवन्त्यापश्च ता उपयुज्यमानाः सूर्य्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्याल्लघुत्वाद्वैशद्याच्च वायोः सञ्चयमापादयन्ति स सञ्चयः प्रावृषि चात्यर्थं जलोपक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातवर्षैरितो वातिकान् व्याधीन् जनयति ॥” इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये ॥
“निदाघोपचितञ्चैव प्रकुप्यन्तं समीरणम् ।
निहन्यादनिलघ्नेन विधिना विधिकोविदः ।
नदीजलं रूक्षमुष्णमुदमन्थं तथातपम् ॥
व्यायामञ्च दिवास्वप्नं व्यवायञ्चात्र वर्ज्जयेत् ॥”
इति चोत्तरतन्त्रे चतुःषष्टितमेऽध्याये सुश्रुतेनोक्तम् ॥)

निदाघकरः, पुं, (निदाघा उष्णाः करा किरणानि यस्य । निदाघस्य उष्णस्य करो वा ।) सूर्य्यः । इति हारावली । ११ ॥

निदाघकालः, पुं, (निदाघ एव कालः । निदाघस्य कालो वा ।) ग्रीष्मर्त्तुः । स तु ज्यैष्ठाषाढ़मासौ । यथा,—
“प्रचण्डसूर्य्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षतवारिसञ्चयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालः समुपागतः प्रिये ! ॥”
इति ऋतुसंहारे । १ । १ ॥

निदानं, क्ली, (नि निश्चयं दीयतेऽनेनेति । नि + दा + करणे ल्युट् ।) आदिकारणम् । इत्यमरः । १ । ४ । २८ ॥ (यथा, रघुः । ३ । १ ।
“निदानमिक्ष्वाकुकुलस्य सन्ततेः
सुदक्षिणा दौर्हृदलक्षणं दधौ ॥”)
कारणम् । वत्सदामादि । (यथा, ऋग्वेदे । ६ । ३२ । २ ।
“उद्गुस्रियाणामसृजन्निदानम् ॥”
नि + दो छेदे + भावे ल्युट् ।) कारणक्षयः । इति मेदिनी । ने, ८३ ॥ (नि + दै प शोधने + भावे ल्युट् ।) शुद्धिः । तपःफलयाचनम् । अवसानम् । इति हेमचन्द्रः । ६ । १५० ॥ रोगनिर्णयः । इति विश्वः ॥ तत्पर्य्यायः । रोग-